# Hanumatkritam Sita Stotram

# हनुमत्कृतं सीतास्तोत्रम्

## Document Information

Text title : Hanumatkritam Sita Stotram

File name : hanumatkRRitaMsItAstotram.itx

Category : devii, devI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | brAhmakhaNDa | setukhaNDa | adhyAya 46/50-57||

Latest update : May 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2025

*sanskritdocuments.org*

# हनुमत्कृतं सीतास्तोत्रम्

इति स्तुत्वा वायुपुत्रो रामचन्द्रं घृणानिधिम् ॥ ४९॥

सीतामप्यभितुष्टाव भक्तियुक्तेन चेतसा ।
जानकि त्वां नमस्यामि सर्वपापप्रणाशिनीम् ॥ १.४६.५०॥

दारिद्र्यरणसंहर्त्रीं भक्तानामिष्टदायिनीम् ।
विदेहराजतनयां राघवानन्दकारिणीम् ॥ ५१॥

भूमेर्दुहितरं विद्यां नमामि प्रकृतिं शिवाम् ।
पौलस्त्यैश्वर्यसंहर्त्रीं भक्ताभीष्टां सरस्वतीम् ॥ ५२॥

पतिव्रताधुरीणां त्वां नमामि जनकात्मजाम् ।
अनुग्रहपरामृद्धिमनघां हरिवल्लभाम् ॥ ५३॥

आत्मविद्यां त्रयीरूपामुमारूपां नमाम्यहम् ।
प्रसादाभिमुखीं लक्ष्मीं क्षीराब्धितनयां शुभाम् ॥ ५४॥

नमामि चन्द्रभगिनीं सीतां सर्वाङ्गसुन्दरीम् ।
नमामि धर्मनिलयां करुणां वेदमातरम् ॥ ५५॥

पद्मालयां पद्महस्तां विष्णुवक्षस्थलालयाम् ।
नमामि चन्द्रनिलयां सीतां चन्द्रनिभाननाम् ॥ ५६॥

आह्लादरूपिणीं सिद्धिं शिवां शिवकरीं सतीम् ।
नमामि विश्वजननीं रामचन्द्रेष्टवल्लभाम् ।
सीतां सर्वानवद्याङ्गीं भजामि सततं हृदा ॥ ५७॥

इति श्रीस्कन्दपुराणे ब्रह्मखण्डे सेतुखण्डे षट्चत्वारिंशा- ध्यायान्तर्गतं
हनुमत्कृतं सीतास्तोत्रं समाप्तम् ।

स्कन्दपुराण । ब्राह्मखण्ड । सेतुखण्ड । अध्याय ४६/५०-५७॥

skandapurANa . brAhmakhaNDa . setukhaNDa . adhyAya 46/50-57..

Proofread by PSA Easwaran

*Hanumatkritam Sita Stotram*

pdf was typeset on May 15, 2025

Please send corrections to *sanskrit@cheerful.com*